# 67th State Level Republic Day Celebration

# Yoga Day (20-01-2016)

On 20th January "Yoga Day" was celebrated on Republic Day in the University Campus. Including School Students and the residents of Veraval, total 1800 people participated in this program. As part of this program, Free Yoga Teaching Classes organized in many places from 16th January to 19th January.




## राज्यस्तरीयः प्रजासत्ताकदिवसान्तर्गतः योगकार्यक्रमः




### ६७ तमस्य प्रजासत्ताकदिवसस्य राज्यस्तरीयः कार्यक्रममान्तार्गते विश्वविद्यालयपरिसरे सामूहिकयोगप्रदर्शनम्

श्रीसोमनाथसंस्कृतयुनिवर्सिटीवेरावलद्वारा राज्यस्तरीयप्रजासत्ताकदिवसान्तर्गत- 'योगदिवस' इति कार्यक्रमः २०/०१/२०१६ तमे दिनाङ्के समाचरितः। विश्वविद्यालयस्यान्तेवासिनः, वेरावलस्थ-विविधविद्यालयेभ्यः समागताः विद्यार्थिनः, वेरावलस्थाः पौराश्च कार्यक्रमेऽस्मिन् विश्वयोगदिवसं निमित्तीकृत्य सर्वकारयोजनानुसारं नियतयोगासनप्राणायामसूर्यनमस्कारान् कृतवन्तः । गीरसोमनाथजनपदसमाहर्ता डॉ. अजयकुमारः, वेरावलपाटणनगरपालिकाप्रमुखः श्रीजगदीशभाईफोफंडी, अन्येऽधिकारिणश्च कार्यक्रमेऽस्मिन् उपस्थाय भागं गृहीतवन्तः। विशेषरूपेण श्रीसोमनाथसंस्कृतविश्वविद्यालयस्य विद्यार्थिन्यः अस्मिन् कार्यक्रमे योगप्रदर्शनमकुर्वन् । डॉ. ललितकुमारपटेलः तथा श्रीजयेशमुंगरा मञ्चसञ्चालनं कृतवन्तौ । कार्यकारिकुलसचिवः डॉ. दशरथजादवः कार्यक्रमस्यास्य संयोजनमकरोत् । १८०० जनाः संभूय योगं कृतवन्तः कार्यक्रमेऽस्मिन्।

अस्यैव कार्यक्रमस्य अङ्गतया वेरावलनगरस्य विविधेषु क्षेत्रेषु निःशुल्कयोगप्रशिक्षणवर्गाः श्रीसोमनाथसंस्कृतविश्वविद्यालयेन १६ तः १९ दिनाङ्कं यावत् आयोजिताः । २६/०१/२०१६ तमे दिनाङ्के ६७ तमस्य प्रजासत्ताकदिवसस्य राज्यस्तरीयः कार्यक्रमः सोमनाथे सम्पन्नः । तत्र विश्वविद्यालयस्य पक्षतः सामूहिकयोगप्रदर्शनं, विश्वविद्यालयचलप्रदर्शनं चाभवत् । तत्र महाऽऽर्तिक्येऽपि विश्वविद्यालस्य अध्यापकाः छात्राश्च भागं गृहीतवन्तः । सामुहिकयोगप्रदर्शने डॉ. जयेशमुंगरामहोदयः संयोजकरूपेण कार्यम् अवहत् ।



विश्वविद्यालयपक्षतः योगदिवस्य आचरतम्

Report Source: **SOMJYOTI**- University Newsletter (Issue: 13, page no. 06)





